(1113) " बिट आक्रोशे " (I-भ्वादिः-317. अक. सेट्. पर.)
' विट—' इति क्षीरस्वामी पपाठ । ' बिड —' इति नन्दी । ' पिट—' इति मल्लः ।

[A]बेटकः-टिका, बेटकः-टिका, बिबेटिषकः-बिबिटिषकः-षिका, बेबिटकः-टिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिटतिवत् (190) ज्ञेयानि । [1]बिडालः ।

(1114) " बिदि अवयवे " (I-भ्वादिः-64. अक. सेट्. पर.)

' अवयवे=एकदेशगतक्रियायाम् ।' इति क्षीरस्वामी । ' भिदि—' इति सम्मताकारः ।

बिन्दकः-न्दिका, बिन्दकः-न्दिका, बिबिन्दिषकः-षिका, बेबिन्दकः-न्दिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककन्दतिवत (163) ज्ञेयानि । [2]बिन्दुः[B] ।

(1115) " बिल भेदने " (VI-तुदादिः-1359. सक. सेट्. पर.) [अ]
बेललः--लिका, बेलकः-लिका, बिबेलिषकः-बिबिलिषकः-षिका, बेबिलकः-

1. ' तमिबिडि—' [द. उ. 8.115.] इत्यादिना कालच्प्रत्यये पृषोदरादित्वात् टकारस्य डकारे च रूपमेवम् । दशपाद्युणादिवृत्तावत्र ' विड —' इति सौत्रो धातुर्ण्यन्तः ।' इति प्रोक्तम् । तच्चिन्त्यम् । तादृशस्य धातोः सूत्रेष्वनुपलम्भात् । दन्त्यौष्ठ्यादिं बशान्तं च येऽपि पठन्ति, तेषामपि वबयोरभेदोच्चारणमेव निदानमिति ज्ञेयम् ।

2. बाहुलकादौणादिके उप्रत्यये रूपम् । मैत्रेयस्तु ' बिन्दुरिच्छुः' (3-2-169) इति सूत्रे निपातनादुकारप्रत्ययान्तत्वं मेने । तदप्रामाणिकम् । यतः, काशिकादिषु " वेत्तेर्नुमि उप्रत्यये निपातनम् बिन्दुः वेदनशीलः " इत्युक्तत्वात् । एतेन, ' यद्यभिधानमस्ति—भिन्दुरिति दृश्यते ।' इति भिदिधातुमत्रावयवार्थे पठन्, तस्योप्रत्ययान्ते भिन्दुरिति साधयंश्च सम्मताकारोऽपि प्रतिबोधित इति ज्ञेयम् ।

A. ' चेटैर्विटैश्चानुगतानबेटकैरेटत्पशूत्केटिरजः कटन् मलान् ।' धा. का. 1.42.

B. ' श्रुतान्दुकैश्चित्तगजेन्द्ररोधिनस्तुष्यन्तु सन्तो गुणबिन्दुलोलुपाः ॥' धा. का. 1.9.

[अ] ' बेलति इति शपि, अयं चुरादौ च ।' इति मा. धा. वृत्तौ आत्रेय वाक्योपादानात् भ्वादिष्वपि कश्चन बिलधातुरस्तीति ज्ञायते । क्षीरस्वामिप्रभृतिभिरनुपादानादस्माभिर्न लिखितः ।